# Shivadhundhiproktam Shivalingarchanamahimakathanam

# શિવઢુણ્ઢિપ્રોક્તં શિવલિઙ્ગાર્ચનમહિમકથનમ્

## Document Information

Text title : Shivadhundhiproktam Shivalingarchanamahimakathanam

File name : shivaDhuNDhiproktaMshivalingArchanamahimakathanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 46 | 35-45 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શિવઢુણ્ઢિપ્રોક્તં શિવલિઙ્ગાર્ચનમહિમકથનમ્

શિવઢુણ્ઢિઃ -
શિવસ્વરૂપાણિ કિલામલાનિ લિઙ્ગાનિ સર્વાણિ શિવાર્ચનં ચ ।
લિઙ્ગે કૃતં સર્વદમિત્યવૈમિ લિઙ્ગાર્ચનેનાપિ સમો ન ધર્મઃ ॥ ૩૫॥

અપારપુણ્યૈઃ શિવપૂજનેષુ ભક્તિર્ભવામ્ભોધિવિનાશનાય ।
ભવિષ્યતીતિ સ્ફુટમેવ મન્યે ન તેન ધર્મેણ સમોઽસ્તિ ધર્મઃ ॥ ૩૬॥

સંસારાઘકુલામ્બુરાશિરસકૃત્ કમ્પં વિધત્તે
મુહુઃ કાલોઽપિ ત્રિપુરારિપૂજનરતો બિલ્વીદલૈઃ કોમલૈઃ ।
લિઙ્ગે તુઙ્ગસરિત્તરઙ્ગનિકરવ્યામે સકૃદ્વા સુરાઃ
સર્વે તત્પદપૂજનાય સતતં કુર્વન્તિ યત્નં મુદા ॥ ૩૭॥

લિઙ્ગારાધનમેવ કેવલમુમાકાન્તપ્રિયં મુક્તિદં
મન્યે પાપહરં ચ સન્તતમિદં બિલ્વીદલૈઃ કોમલૈઃ ।
કર્તવ્યં સકૃદેવ વા સભસિતર્જેતું યમં શામ્ભવં
સમ્પ્રાપ્તું પદમપ્યપારવિભવં સત્યં ત્રિસત્યં પરમ્ ॥ ૩૮॥

ભસ્માલઙ્કૃતદેહમર્ચકમુમાકાન્તસ્ય બિલ્વીદલૈઃ
દૃષ્ટ્વા પાપમહામ્બુરાશિકુલમપ્યામૂલલૂનં ભવેત્ ।
દુઃખાબ્ધિઃ પ્રલયં પ્રયાત્યપિ ભટાઃ કાલસ્ય દૂરં પરં
યાન્ત્યેવાશુ શિવાર્ચનોદ્યતમતિસ્તસ્માત્ સુરૈઃ પૂજ્યતે ॥ ૩૯॥

લિઙ્ગારાધનપુણ્યરાશિજફલં વક્તું ન શક્તાઃ સુરાઃ
સેન્દ્રોપેન્દ્રપુરોગમા અપિ તથા સિદ્ધાઃ પ્રસિદ્ધા અપિ ।
ગન્ધર્વા અપિ કિન્નરા અપિ ગણૈર્જ્ઞેયોઽથવા ન ત્વયા
વેદૈર્વા ગિરિશઃ પરં સુખરો જાનાતિ તત્ત્વં પરમ્ ॥ ૪૦॥

અભ્યર્ચિતાનિ લિઙ્ગાનિ દૃષ્ટ્વા વા પરયા મુદા ।
દેહાન્તે શાઙ્કરં સ્થાનં પ્રાપ્નુવન્તિ ન સંશયઃ ॥ ૪૧॥

પ્રાતઃ પૂજિતમાલોક્ય શિવલિઙ્ગં શિવાત્મકમ્ ।
ભવેદ્રાત્રિકૃતૈઃ પાપૈર્વિમુક્તો વિવિધૈરપિ ॥ ૪૨॥

લિઙ્ગં મધ્યાહ્નકાલેઽપિ પૂજિતં યસ્તુ પશ્યતિ ।
સ પૂર્વાહ્નકૃતૈઃ પાપૈઃ સર્વૈરપિ વિમુચ્યતે ॥ ૪૩॥

પ્રદોષકાલે યઃ પશ્યેત્ શિવલિઙ્ગં સમર્ચિતમ્ ।
સ સપ્તકલ્પપર્યન્તકૃતૈઃ પાપૈર્વિમુચ્યતે ॥ ૪૪॥

યત્ પુણ્યં જાયતે ભક્ત્યા શિવલિઙ્ગાવલોકને ।
તત્પુણ્યમન્તરહિતં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૪૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવઢુણ્ઢિપ્રોક્તં શિવલિઙ્ગાર્ચનમહિમકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૪૬। ૩૫-૪૫ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 46. 35-45 ..

Proofread by Ruma Dewan

---

*Shivadhundhiproktam Shivalingarchanamahimakathanam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*